ण न वाच्यम् वह्निसामान्याभावस्यापि कालिकादिसंबंधेन धूमवति सत्त्वादव्याप्त्या
पत्तेः नापि दैशिकविशेषणतया घटभिन्नं द्रव्यत्वादित्या [illegible] दावतिव्याप्त्यापत्तेः
घटत्वत्वरूप [illegible] साध्याभावस्य दैशिकविशेषणतया वृत्तिविरहादतो लक्ष
णांतरमाह प्रतियोगिव्यधिकरणेत्येति लक्षणं नरमुक्तमित्यप्याहुः हेतुसमाना
धिकरणस्य प्रतियोगिव्यधिकरणस्याभावस्य प्रतियोगितायाः सामानाधिकर

तावच्छेदकावच्छिन्नीयत्वेन साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताश्रयाधिकरणान्यत्वं हेतुमत्तस्या दृशप्रतियोगि
त्वसमानाधिकरणवृत्तित्वावच्छिन्नप्रतियोगिताक तादृशप्रतियोगितावच्छेदकत्वाभाववत्त्वं तादृशप्रतियोगि
तावच्छेदकान्यत्वं वा साध्यतावच्छेदकोपि वाहितम् तथाच घटादिनिष्ठस्य वह्नित्वेन घटाद्यभावप्रतियोगित्व
स्यापि तादृशत्वेन वह्नित्वादेस्तदवच्छेदकत्वाद्व्याप्तिः तत्सामानाधिकरण्येनेत्युक्तम् तथाच वह्नित्वस्य ता
दृशाभावप्रतियोगितावच्छेदकत्वेऽपि तादृशप्रतियोगितासमानाधिकरणवृत्तित्वरूपव्यधिकरणधर्मेण ता
दृक्प्रतियोगितावच्छेदकत्वाभावस्य तत्र सत्त्वान्नाव्याप्तिः कालो घटवान्महाकालत्वादित्यादौ तु घटादिसामान्या
न भावप्रतियोगिताया अतथात्वेऽपि घटत्वेन पटाद्यभावप्रतियोगितामादाय एव लक्षणसंगतिः कालः पटत्वेन
पटवानिति घटत्वेनेत्यननुभवात् वह्नित्वादिसामान्यधर्मेण महानसीयवह्न्याद्यभावसत्त्वे तु यादृशप्रतियोगि
तावच्छेदके तत्तद्व्यक्त्यवच्छेदकत्वमनतिरिक्तवृत्तित्वरूपं ग्राह्यम् तच्च तदतिरिक्तवृत्तित्वे सति तत्समानाधिकरणत्वं य
यत्तदन्यत्वं नातो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अत एव वारणसंभवे सामानाधिकरण्यदलवैयर्थ्य

न्नप्रतियोगितैवलक्षणघटितेतिवाच्यम् विशिष्टसत्तावाञ्जातेरित्यादावतिव्याप्त्यापत्तेः गुणादीनामपि विशिष्टसत्ता
निष्ठप्रतियोगिताश्रयाधिकरणत्वात् घटवान्महाकालत्वादित्यादौ अव्याप्तिप्रसंगाच्च हेतुमतो महाकालस्य
साध्यताघटककालिकसंबंधेन घटाद्यभावप्रतियोगिताश्रयाधिकरणतया प्रतियोगिव्याधिकरणाभावाप्रसिद्धेरिति चेद
त्राहुः साध्यतावच्छेदकसंबंधेन स्वाश्रयवृत्तित्वावच्छेदकधर्मावच्छिन्नाधिकरणयावद्वृत्त्यधिकरणिकायावत्यः प्रति
योगितास्तदन्यप्रतियोगित्वं प्रतियोगित्वांतार्थः तथाच वह्नित्वेन घटाभावस्यापि घटनिष्ठप्रतियोगितातादृशीतित
दवच्छेदकत्वं वह्नित्वेप्यस्तीत्यतः सामानाधिकरण्यपदं घटवान्महाकालत्वादित्यादौ तु गगनाभावीयं गगननिष्ठ
मेव तादृशं प्रतियोगित्वं सुलभमिति न कोपि दोषः वस्तुतो धूमवति वह्नित्वेन घटो नास्तीतिवत् धूमवान्वह्नित्वे
न न घटवान् किंतु घटत्वेनेति प्रतीतिबलाद्व्याधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकोप्यन्योन्या
भावोस्ति अतएव समवायितया वाच्यत्ववद्भेदोपि घटादौ पक्षधरमिश्रैः स्वीकृतः तथाच यादृशप्रतियोगि

76

नीभावादिकमादायैवतन्नलक्षणसमन्वयसंभवाच्चेत्याहुः तन्न प्रतियोगिभेदेपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगि
तायाप्यभेदात्तादृशवह्नित्वेन घटाभावस्यापि वह्नित्वावच्छिन्नाघटनिष्ठप्रतियोगितासैव वह्नित्वेन वह्निधूमोभ
याभावस्यापि वह्नित्वावच्छिन्नाधूमादिनिष्ठप्रतियोगितालाघवात् तथा च सामानाधिकरण्येनेत्यस्य वैय
र्थ्यं दुर्वारम् वह्नित्वेन घटाभावीयं घटनिष्ठं यत्प्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तादृशप्र
तियोगिताश्रयीभूतवह्निधूमादेश्च द्वयोरधिकरणत्वस्य सर्वत्रैव हेतुमति सत्वेन वह्नित्वरूपव्याधिकरण
धर्मावच्छिन्नप्रतियोगितायालक्षणघटकत्वादिति दिक् एवं चेति तथा चाव्यभिचारस्य पारिभाषिकत्वा
नादरेपि न क्षतिरिति भावः वह्नित्वाद्यवच्छिन्नघटाभाववति धूमादेर्वर्तमानत्वादतउक्तं साध्याभावेति
अत्र साध्याभावोपि व्याप्यवृत्तिर्बोध्यः एवं परत्रापि विशिष्टेति महानसीयत्वादिविशिष्टवह्नित्वावच्छि
न्नप्रतियोगिताकेत्यर्थः ननु विशिष्टस्यातिरिक्तत्वान्महानसीयत्ववह्नित्वयोर्वैशिष्ट्यस्यैव वा परंपर
याऽवच्छेदकत्वान्नेष्टदोष इत्यत आह हृदत्ववह्नित्वेति ननु व्याप्यवृत्तित्वघटितलक्षणयोः संयोगिसत्वा
दित्यत्रातिव्याप्तिः स्वसमानाधिकरणाभावाप्रतियोगित्वरूपस्यावच्छिन्नवृत्तिकान्यत्वरूपस्य वा व्याप्यवृत्तित्वस्य संयो

यत्तु यत्प्रतियोगितावच्छेदकावच्छिन्नयत्प्रतियोगिताश्रयत्वं च द्वयोः साध्यतावच्छेदकसंबंधेनानधिकरणं हेत्वधिकरणं
तादृशप्रतियोगित्वं प्रतियोगितां तार्थः तथा च वह्नित्वेन घटाद्यभावस्य घटनिष्ठप्रतियोगितायाः अपि तादृशत्वाद्वह्नि
त्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरतः सामानाधिकरण्येनेति प्रागुक्तार्थकम् एतन्मते सामान्यरूपेण विशेषाभावानभ्यु
पगमेनातो वह्नित्वेन तदन्यभावमादायाव्याप्तिः न च स्वरूपसंबंधात्मकप्रतियोगितायाः प्रतियोगिभेदेनाभिन्नत्वाद्वह्नि
मान्धूमादित्यत्राव्याप्तिः वह्निसामान्याभावीयपर्वतवृत्तिमहानसीयवह्निनिष्ठप्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशि
ष्टस्य तत्प्रतियोगिताश्रयीभूतस्य महानसीयवह्नेश्च द्वयोरनाधिकरणत्वस्य हेतुमति पर्वते सत्त्वादिति वाच्यं प्रतियो
गिव्यक्तीनां भेदेपि एकधर्मावच्छिन्नप्रतियोगितायाः लाघवेनैक्यस्वीकारात् न च कालो घटवान्महाकालत्वादित्यादौ
तादृशप्रतियोगित्वाप्रसिध्याव्याप्तिः गगनाभावीयप्रतियोगिताश्रयीभूतगगनस्याधिकरणाप्रसिध्या तादृशप्रतियो
गितायोगितायालक्षणघटकत्वादिति वाच्यम् महाकालान्यत्वविशिष्टघटाद्यभावस्य तादृशविशिष्टघटत्वाद्यव
च्छिन्नप्रतियोगिताव्यक्तेरेव तथात्वात् यत्प्रतियोगितावच्छेदकावच्छिन्नयत्प्रतियोगिताश्रयोभयत्वं वा हेत्वधिकर
णपर्याप्तिं वान्निष्ठाधिकरणतानिरूपकतानवच्छेदकं तादृशप्रतियोगितायाः एवं निवेशनतया घटत्वादिना गग

पि

तिमत्त्वादित्यादौ गुणवृत्तित्वमादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं संभवति गुणवृत्तित्वावच्छिन्नाभावस्यापि हेतु
समानाधिकरणत्वादतः संयोगसाध्यके व्यभिचारिमात्रे यद्धर्ममादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं तद्धर्ममाह
द्रव्यमात्रेति द्रव्यान्यासमवेतत्वेत्यर्थः उक्ताभावानामव्याप्यवृत्तित्वे संयोगात्मकत्वप्रतियोग्यधिकरणवृत्तित्वेन क
दाचिद्गुणत्वादिरूपाणां तत्प्रतियोगितावच्छेदकानां संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं
न स्यात्तदेव तु नास्ति तेषां व्याप्यवृत्तित्वेन संयोगात्मकत्वप्रतियोग्यधिकरणवृत्तित्वात् एतावन्मात्रं सच्चापि तु व्या
प्यवृत्तीति प्रगल्भलक्षणं दूषयितुमुपन्यस्यति साध्यतावच्छेदकेति स्वपदं विशिष्टहेतुपरं तथा च यद्धर्मावच्छि
न्नसमानाधिकरणसाध्याभाववत्त्वावच्छेदे न साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं तद्धर्मवत्त्वं प
र्यवसितम् अवच्छेदकत्वं चेहानतिरिक्तवृत्तित्वम् व्यभिचारिणि तु हेतुसमानाधिकरणसाध्यसामान्याभावस्यैव
साध्यसामानाधिकरण्यविरहान्नातिप्रसंगः विशिष्टसत्तावानितीत्यादौ यावत एव हेतुसमानाधिकरणसाध्याभा
वस्य सत्तारूपसाध्यसामानाधिकरण्यादतिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति तथा च विशिष्टसत्ताभावस्यै
व तादृशस्य विशिष्टसत्तारूपसाध्यासमानाधिकरणत्वान्नातिप्रसंगः अत्र च साध्यसामानाधिकरण्यं येन सं

साध्याभावत्व व्यापकमित्यर्थः

79

गाभावेऽसत्वादत आह सत्त्ववतीति तथा च हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यनेन निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वं
हेत्वधिकरणे च यत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगित्वं वाभावस्य विवक्षितमिति भावः गुरुधर्मेण साध्यतायां व्यभिचा
रिण्यतिव्याप्तिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य प्रकृते निरुक्तत्वाप्रवेशोऽपि न क्षति
रित्याशयेनाह वक्ष्यमाणं वेति यथाश्रुतस्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वरूपस्य सत्तावान् जातेरित्यादाव
व्याप्तेः तादृशप्रतियोगितावच्छेदकीभूतविशिष्टसत्तात्वानतिरिक्तवृत्तित्वात् सत्तात्वस्येत्यतो वक्ष्यमाणमिति त्विदं
तल्लक्षणे वक्ष्यमाणमित्यर्थः तथा च हेतुमन्निष्ठाभावीययत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनाव
च्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावीययत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं तदेव
पारिभाषिकावच्छेदकं तदन्यत्वं साध्यतावच्छेदके वाच्यमिति भावः ननूत्पत्तिदशायां गुणसामान्याभावस्य संयो
दी० ३ गवति घटेऽसत्वात् गुणत्वस्य संयोगत्वविशिष्टसंबंधिनिष्ठाभावीयसमवायसंबंधावच्छिन्नप्रतियोगितानवच्छेदक
त्वविरहान्न तमादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वसंभावनेत्यत आह गुणवृत्तीत्वेति गुणसमवेतत्वे
त्यर्थः घटादावुत्पत्तिदशायामपि गुणसमवेतस्य द्रव्यत्वादेः सत्वान्न तदभाव इति भावः संयोगि गुणान्यत्वेस

४०

न्नप्रतियोगिताकगगनाभावस्याभावे साध्ये एवं प्रमेयत्वादिकं हेतुस्तत्र हेतुमति देशीकविशेषणतया वर्तमानस्याकाशा
भावात्मकसाध्याभावस्य साध्यवति देशीकविशेषणतयावृत्तावपि हेतुसमानाधिकरणस्य नित्यत्वादिसामान्याभाव
स्यापि निरुक्तसाध्याभावतयातस्यैव समानाधिकरणपदविरहान्नातिव्याप्तिः यत्समानाधिकरणेति यत्समानाधिक
रणसाध्याभावप्रमासामान्यइत्यर्थः तेन धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रमाव्यक्तेस्सा
ध्यवत्ताज्ञानाविरोधित्वेपि धूमसामान्याभावप्रमाया एव साध्यवत्ताज्ञानाविरोधितया नातिव्याप्तिः व्यधिकरणधर्मा
वच्छिन्नसाध्याभावस्य साध्यसामान्याभावत्वभ्रमदशायां पर्वतो वह्निमानित्याद्याकारकसाध्यवत्ताज्ञानविरोधि
त्वादसंभवः स्यादिति प्रमात्वोपादानं प्रमात्वं चात्र भ्रमसामान्यभिन्नज्ञानत्वं नातस्तादृशबुद्धेरप्यंशतः प्रमा
त्वादुक्तदोषतादवस्थ्यम् ह्रदादौ वह्निसामान्याभावप्रमायाः साध्यवत्वधीविरोधित्वादव्याप्तिरतो यत्स
मानाधिकरणेति फलतस्तत्प्रमाविशेषणं तथा च यद्धर्मावच्छिन्नं द्विशेष्यसाध्याभावप्रमासामान्यइत्यर्थः ते व
नैतद्वृत्तित्वसमानाधिकरणस्य संयोगसामान्याभावस्यैव गुणादिधर्मिणी प्रमायाः साध्यवत्ताज्ञानविरोधित्वेपि संयोगिए
तद्वृत्तित्वादित्यादौ नाव्याप्तिः यत्तु साध्यवत्ताज्ञानविरोधित्वे हेतुवन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यत्साध्य

बंधेन साध्यतानेन संबंधेन साध्यस्याधिकरणे दैशिकविशेषणतया वृत्तिमत्त्वरूपं ग्राह्यं तेन द्रव्यत्वादि समानाधिकरण
स्य ज्ञानाद्यभावस्य विषयतया ज्ञानाद्यधिकरणे वृत्तावपि समवायेन ज्ञानसाध्यके द्रव्यत्वादिहेतौ नातिव्याप्तिः नवा कालः
प्रमेयत्वादित्यादौ सर्वेषामेव साध्याभावानां साध्यवति काले कालिकसंबंधेन वृत्तावव्याप्तिप्रसंगः साध्याभावनिष्ठ
हेतुसामानाधिकरण्यमपि हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नप्रकृतहेतोर्यदधिकरणं तत्राविशेष
म णतया वृत्तित्वरूपं वाच्यं तेनात्मात्मज्ञानादित्यादौ विषयतया ज्ञानस्य हेतोरधिकरणे वर्तमानस्यात्मत्वसामान्याभा
वस्य द्रव्याविशिष्टसत्त्वादित्यौ वसत्तासमानाधिकरणस्य द्रव्यत्वसामान्याभावस्य साध्यसामानाधिकरण्यविरहेपि नाव्या
प्तिः नवा कालः कालपरिमाणादित्यादौ हेत्वधिकरणे काले कालिकसंबंधेन वर्तमानस्य कालत्वादिसामान्याभा
वस्य साध्यवति दैशिकविशेषणतया वृत्तित्वविरहेपि क्षतिः साध्याभावस्तु पूर्वोक्तद्वितिपरीत्या बोध्यः तेन
व्याधिकरणधर्मावच्छिन्नाभावासत्वेपि साध्यस्य विशिष्टाभावादिकमादायैव लक्षणसंभवान्न प्रतियोग्यवृत्ति
दि श्चैत्यांश्रयावतारासंगतिः कपिसंयोगी सत्त्वादित्यादौ तु कपिसंयोगाद्यभावस्य साध्यसामानाधिकरण्येपि
द्रव्यमात्रसमवेतत्वावच्छिन्नाभावस्य साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः एवं कालिकसंबंधावच्छि

ना·व्या·
८२

त्व१

वच्छेदकत्वसमानाधिकरणैकत्वमित्यत एव प्रथमलक्षणस्य द्वितीयस्य च यत्समानाधिकरणप्रमासामा
न्ये साध्यवत्तात्त्वनाविरोधित्वं नास्तीत त्वमित्यत एव सामंजस्यादिति भावः यत्तु यत्समानाधिकरणसाध्याभाव
त्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगीसामानाधिकरण्यं तत्त्वमेव प्रथमलक्षणार्थः तथा च ध
मसमानाधिकरणस्य घटादिसामान्याभावस्य वह्नित्वावच्छिन्नप्रतियोग्यप्रसिध्या साध्यतावच्छेदकावच्छि
न्नप्रतियोगीसामानाधिकरण्याभावादसंभवः स्यादतः साध्याभावपदम् न चैवमपि प्रतियोगिपदवैयर्थ्य
मेवेति वाच्यम् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वे साध्यतावच्छेदकावच्छिन्नप्रतियोगीसामानाधिकर
ण्याभावस्याखण्डस्यैवानिविष्टत्वात् एवं द्वितीयलक्षणेपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्तावो
धावधितोधित्वंनिवेशस्य साध्याभावपदस्य सार्थक्यं बोध्यमिति तन्मंदं प्रतियोग्यवृत्तिश्चेत्यादिग्रंथावतार
नुरोधेन साध्याभावस्य पूर्वोक्तद्वितीयपरीत्ये ववक्तव्यतया हेतुसमानाधिकरणस्य वह्नित्वेन घटाभावादेः
साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याप्रसिध्या तादृशपदप्रवृत्तेप्यसंभवतादव
स्थ्यात् न च घटत्वेन वह्न्यभाव एव वह्नित्वेन घटाभावः समनियताभावानामैक्यात् तथा च

ध

83

राम
८२

वत्ताज्ञानं तद्विरोधित्वरूपं वाच्यं तथाच गुणो न संयोगीति प्रमायाः गुणः संयोगीत्याकारकबुद्धिविरोधित्वेपि ताद
शी साध्यवत्ताधीर्न हेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यिका गुणत्वादेर्हेतुमदन्यवृत्तित्वादतो नोक्तदोष इति।
तत्तुच्छं यत्समानाधिकरणेत्यस्य व्यर्थतापत्तेः साध्याभावप्रमासामान्ये यद्धेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशे
ष्यकसाध्यवत्ताज्ञानविरोधित्वं नास्ति तत्त्वमित्यस्यैव सम्यक्त्वात् जलादिधर्मिकवह्निसामान्याभावप्रमायाः
साध्यवत्ताधीविरोधित्वेपि धूमवन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं पर्वतो वह्निमत्ताज्ञानं तदविरोधित्वादेव
वह्निमान् धूमादित्यादावव्याप्त्यसंभवादिति दिक् अत्र च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदक
रूपेण साध्यवत्ताज्ञानाविरोधित्वं बोध्यं तेन पर्वतो न समवायेन वह्निमानिति प्रमायाः समवायेन वह्नि
मत्ताबुद्धिं प्रति पर्वतो महानसीयवह्निमानिति प्रमायाश्च संयोगेन महानसीयवह्निमत्त्वबोधं प्रतिप्र
तिबंधकत्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः प्रतिबंधकत्वं चात्रावच्छेदकधर्मवत्ताग्रहादिव्यावृत्तं
ग्राह्यं तेन वह्निसामान्याभावावच्छेदकतया गृहीतस्य महानसीयवह्न्यभावादेः पर्वतादौ प्रमायाः संयोग
संबंधावच्छिन्नपर्वतधर्मिकवह्निमत्ताबुद्धिविरोधित्वेपि नासंभवः सर्वत्रेति साध्यसामानाधिकरण्या

84

न्या॰व्या॰
४३

शायामपि धूमसाध्यकानुमित्यनुत्पत्त्या वान्हिनिष्ठस्य निर्धूमवृत्तित्वस्य धूमसाध्यकानुमितिप्रतिबंधकतानव
च्छेदकत्वाद्व्यभिचारिण्यपि व्याप्तिताद्वस्थ्यमिति वाच्यम् यन्निष्ठसाध्याभाववद्वृत्तितात्वावच्छिन्नविषयितासामा
न्येन प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वमित्यस्योक्तत्वात् साध्याभाववत्तु पूर्वोक्तद्वितीयरीत्या प्रवेशनीयः
तेन न पूर्वोक्तदोषः अनुमित्याविरोधित्वेनेति अनुमितिविरोधित्वं हि न साक्षादनुमितिप्रतिबंधकत्वं व्यभिचार
धियः साक्षादतथात्वेन व्यभिचारिमात्रेऽतिप्रसंगापत्तेः किंत्वनुमितिजनकज्ञानविरोधित्वम् तज्जनकं च यदि निरु
श
क्तव्याप्तिज्ञानं तदा तादृशज्ञानं प्रति न साध्याभाववद्वृत्तित्वज्ञानं विरोधि किंतु साध्याभाववद्वृत्तित्वमनुमितिविरोधी
त्याकारकज्ञानमेव तथेति व्यभिचारिण्यपि व्याप्तिः यदि च साध्याभाववद्वृत्तिर्हेतुरित्याकारं ज्ञानं प्रकृतानुमितिज
नकं तदा निरुक्तव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानमर्थांतरग्रस्तमिति भावः एतेन यदि प्रकृतानुमितिपदं प्रकृ
तहेतुधर्मिकसाध्याभाववद्वृत्तित्वानुमितिपरं न तु प्रकृतसाध्यकानुमितिपरं विरोधित्वं चात्र साक्षादेव निवे
श्यते तदा न व्यभिचारिण्यतिप्रसंगः इत्यपास्तम् तादृशव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानेऽर्थांतरतादव
स
स्थ्यादिति मिश्रलक्षणमेव परिष्कृत्योपन्यस्यति केचित्त्विति केवलान्वयिनि व्याप्तिश्चावापि वन्ह्यादिसाध्यके
व्यतिरेकिणि यावंतः साध्याभावाः तत्तत्सजातीयत्वं तत्तदधिकरणवृत्तित्वाभावे तादृशान्यतररूपात्मकमप्र

85
राम
४३
व

तस्यापि साध्यतावच्छेदविशिष्टवह्निरूपप्रतियोगिनः सामानाधिकरण्यमनुमेयमेवेति वाच्यं तथा सति घटसामान्याभा
वादेरपि घटत्वादिना प्रमेयसामान्याभावात्मकतया तस्यापि साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रमेयरूपप्रतियो
गिसमानाधिकरणतया तमादायासंभववारकस्य साध्याभाववपदस्य वैयर्थ्यताया वज्रलेपत्वादिति प्रगल्भस्यैव लक्ष
णान्तरमुपन्यस्यति पात्वेति यद्वृत्तावेति यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्य इत्यर्थः तेन वह्निनिष्ठस्य व्यधिक
रणधर्मावच्छिन्नधूमाभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यविरोधित्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः धूमा
दिनिष्ठस्येन्धनत्वाद्यवच्छिन्नवह्न्यभाववद्वृत्तित्वस्यापीन्धनत्वादिप्रकारेण वह्न्यनुमितिविरोधित्वादसंभवः स्याद
तः प्रकृतेति साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकरूपेण च प्रकृतसाध्यकेत्यर्थः तथा च तादृशसाध्याभाव
वद्वृत्तित्वस्य वह्नित्वेन वह्न्यनुमितिं प्रत्यविरोधित्वाददोषः प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिविरोधिता न विष
यत्वमात्रम् धूमनिष्ठवृत्तित्वस्यापि वह्न्यनुमितिविरोधिनो व्यभिचारभ्रमस्य विषयत्वसंभवात् किंतु विषयितया
प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वम् तथा च वह्निनिष्ठवृत्तित्वमात्रस्य धूमसाध्यकानुमितिविरोधिता
वच्छेदकत्वाभावाद्व्यभिचारिण्यतिव्याप्तिरतः साध्याभाववतीति तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यं
प्रकृतानुमितिप्रतिबंधकतानवच्छेदकं तत्त्वमर्थः नच घटाभाववद्वृत्तित्वादौ साध्याभाववद्वृत्तितात्वभ्रमद

दन्यतमत्वतदभावान्यतररूपेण साजात्यं वाच्यमिति दोषः समनियताभावानामैक्यात् गगनाभाव एवानीतवैलक्ष्याधिकरण
धर्मावच्छिन्नाभाव इति मते तु गगनाभावत्व तदन्यत्वान्यतररूपेणैव साजात्यं वाच्यम् तेन घटत्वेन निर्धूमवृत्तित्वा
भावस्यैव गगनत्वादिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतया धूमसामान्याभावसजातीयत्वेपि नातिव्या
तिः साध्याभावश्चेति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावोत्र साध्याभा
वपदेन वक्तव्यः तृतीयार्थः साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वरूपप्रथमरीत्याभिधाने घटत्वविशिष्टवाच्य
त्वाद्यभावस्यापि साध्याभावपदार्थतया तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य कुत्रापि हेतावसत्त्वादसं
संभवः स्यादतस्तत्परित्यागः अत्र साध्यव्यापकताघटकसंबंधेनैव साध्यव्यापकस्याभावो ग्राह्यः तेनैकसंबंधे
न साध्यव्यापकस्य संबंधान्तरावच्छिन्नाभाववति हेतोर्वृत्तावपि न क्षतिः यत्तु साध्यतावच्छेदकसंबंधेनैव साध्य
व्यापकत्वं तेनैव च संबंधेन साध्यव्यापकस्याभावो निवेश्य इति मतं तत्तुच्छम् यत्र तादात्म्यसंबंधेन प्रमेयमात्रं साध्यं तत्र
तादृशसंबंधेन साध्यव्यापकतावच्छेदकं यत्प्रमेयत्वादिकं तादात्म्येन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या तत्र
हेतावव्याप्तिः प्रमेयत्वेन घटपटोभयभेदस्वीकारेण कथंचित् तत्राव्याप्तिवारणेपि वृत्त्यनियामकसंबंधेन सा

87

88

सिद्धमत उक्तं प्रत्येकमिति यावंतः साध्याभावास्तेषां प्रत्येकमपि सजातीयत्वमेकस्मिन्नभावे नास्तीति अत उक्तं
(इति) तत्तत्सजातीया इति तदधिकरणत्वाभावा इत्युक्तौ तत्पदेन यावत्साध्याभावपरामर्शो वह्निमान्धूमाद्रूपसामा
न्याभाववान्वायुत्वादित्यादौ साध्याभावात्मकतत्तद्विषयतावृत्तित्वावच्छिन्नाभाववद्यावद्रूपाधिकरणाप्रसिध्या
ऽव्याप्तिरतस्तत्तदधिकरणेति तथाच प्रातिस्विकरूपेण साध्याभावाननुपादाय तत्तत्सजातीय तत्तदधिकर
णवृत्तित्वाभावो ग्राह्य इति भावः व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य सजातीयं घटत्वादिना तत्तदधिकर
णवृत्तित्वाभावमादायाव्यभिचारिण्यतिव्याप्तिवारणाय यावन्त इति तथाच साध्यसामान्याभावसजातीयस्य तद
धिकरणवृत्तित्वसामान्याभावस्य तत्राभावान्न दोषः साध्यसामान्याभाववद्वृत्तित्वस्येव व्यधिकरणधर्मावच्छि
न्नाभावोऽव्यभिचारिण्यप्यस्तीति अतः सजातीया इत्युक्तम् ननु घटत्वेन निर्धूमवृत्तित्वाभावोऽप्यभाववत्त्वादिना
धूमसामान्याभावसजातीय एवेत्यतिव्याप्तितादवस्थ्यमत आह साजात्यं चेति यद्यपि साध्याभावनिष्ठं यत्स
मानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपं तेनैव रू (रु)
पेण साजात्यं वाच्यं तथाच वह्निसामान्याभावादिनिष्ठं वह्नित्वावच्छिन्नप्रतियोगिताकत्वरूपं तस्य निर्वह्नि
वृत्तित्वसामान्याभावादावसत्त्वादसंभवः तथापि यावत्समानाधिकरणधर्मावच्छिन्नाभावात्वाव

केन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनासामानाधिकरण्यविरहेप्युक्ताभावस्य न संग्रहः न वा व्याप्यत्वत्वेन ज्ञेयत्वाभाव
स्यैव ज्ञेयत्वत्वेन वाच्यत्वाद्यभाववत्तया व्यधिकरणधर्मावच्छिन्नाभावमात्रस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिक
रण्येपि तदसंग्रहः अत्र च निरुक्तायास्तदन्यप्रतियोगिताया एव साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं बोध्यं तेन संयोगात्म
कस्यैव साध्याभावस्य समवेतसामान्याभावनिष्ठानिरुक्तप्रतियोगिताकत्व कपिसंयोगाभावत्वरूपसाध्यव्यापकतावच्छेदकरूपा
वच्छिन्नप्रतियोगिताकत्वयोः सत्वेपि कपिसंयोगाभाववान्वाच्यत्वादित्यादौ रूपत्वेनानित्यसमवेतसामान्याभावस्यैव नित्यरूपसामा
न्याभाववत्तया तत्रानित्यरूपत्वावच्छिन्ननिरुक्तप्रतियोगिताकत्व साध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रतियो
गिताकत्वयोः सत्वेपि च रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः समवेतसामान्याभावत्वावच्छिन्नप्रतियोगितायाः साध्यव्या
पकतावच्छेदकरूपानवच्छेद्यत्वादिति ध्येयम् द्वितीयरीतेः प्रवेशस्य फलमाह न तत्साध्यव्यापकेति अभावव
ति हेतोर्वृत्तावपि नाव्याप्तिरित्यन्वयः व्याप्यवृत्तित्वादेः फलमाह अव्याप्यवृत्तेर्वा साध्यस्येति तत्तत्साध्याभावेत्यादि सामा
न्यतः साध्याभाववद्वृत्तित्वव्यापकत्वोक्तौ वह्निसामान्याभावसजीयस्य व्यधिकरणधर्मावच्छिन्नाभावसाधारणसा
ध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभावस्याप्रसिद्ध्याव्याप्तेरेकिमात्रेऽव्याप्तिरतस्तदिति साध्याभावस्य विशे
षणम् तथा च वह्निवृत्तित्वादिसामान्याभाववान् निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्तत्र साध्याभावसजी

ध्यतापामव्याप्तिः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः किंचैवं धूमवान्वन्हेरित्यादावतिव्याप्तिः संयोगेन
धूमसामान्याभावस्याव्याप्यवृत्तितया धूमत्वेन घटाभावस्यैव तादृशस्य यावदंतर्गतत्वेन तत्सजातीयस्य तदधिकरणवृ
त्तित्वाभावस्य वन्हौ सत्वात् अस्माकं तु स्वरूपसंबंधेनापि उभेदस्यापि धूमव्यापकतया वन्हेस्तदभाववद्वृत्तित्वादेवाति
व्याप्ती निरासादिति ध्येयम् ननु कपिसंयोगी एतत्वादित्यत्राव्याप्तिः कपिसंयोगसामान्याभावस्यापि प्रतियोगिवैयधिकर
ण्यघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन यावदंतर्गतत्वात्तत्सजातीयस्य तदधिकरणवृत्तित्वा
भावस्यापि हेतावभावादत आह व्याप्यवृत्तिश्चेति व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वं संयोगिसत्वादित्यादौ द्रव्यादिसा
मान्याभावस्यापि साध्याभाववत्तया हेतोस्तदधिकरणवृत्तित्वादेव नातिव्याप्तिः ननु रूपवान् पृथिवीत्वादित्यादावव्याप्तिः रू
पत्वेन नित्यसमवेताभावस्यापि निरुक्तयावत्साध्याभावांतर्गतत्वात्तत्सजातीयस्य तत्तदधिकरणवृत्तित्वसामान्याभाव
स्य हेतावसत्वात् सामान्यधर्मेण विशेषाभावस्वीकारे तु रूपत्वेन तत्तद्रूपाभावमादायाव्याप्तिरत आह प्रतियोगितावच्छे
दकावच्छिन्नप्रतियोगीति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणत्वं च यत्प्रतियोगिताकाभावे स्वावच्छेद
कसंबंधेन स्वसमानाधिकरणस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तदन्यप्रतियोगिताकत्वमवोध्यम् तेन नित्यरूपात्म

त्वा

स्वपदं प्रतियोगितापरं १

जगत्१ त्व

तत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यस्यैव हेतुतया तादृशतादात्म्यस्य केवलान्वयित्वेन तद
वच्छिन्नाभावाप्रसिद्ध्या ऽव्याप्तिः स्यादतो निषेधद्वयगर्भता यत्तु तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा इत्यु
क्तावसंभवः स्यात् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेस्तादृशवृत्तित्वत्वम
पेक्ष्य लाघवाद्वृत्तित्वत्वमात्रस्यैवोक्ताभावप्रतियोगितावच्छेदकत्वादिति तन्न तुच्छम् गुरोः प्रतियोगितावच्छेदक

महाकाल

त्वमंगीकृत्यैव लक्षणकरणात् अन्यथा भेदे साध्ये जन्यत्वविशिष्टघटादेः कालिकसंबंधेन हेतुतायाम् अव्याप्तिप्र
संगात् महाकालभेदाभाववद्वृत्तित्वत्वमपेक्ष्य लघुना वृत्तित्वत्वमात्रेणैव महाकालभेदाभाववद्वृत्तित्वाभावप्र
तियोगितायाः अवच्छेदात् महाकालभेदाभाववज्जातीयस्य तद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छि
न्नप्रतियोगिताकाभावस्याप्रसिद्धेरिति ध्येयम् तादृशवृत्तित्वत्वव्यापकेत्यस्य प्रयोजनमाह साध्याभाववद्व्यक्ति
विशेषवृत्तित्वस्येति साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसंग इत्यन्वयः ननु व्यभिचारानिरूपकाधिकरण
व्यक्त्यन्यत्वाभावस्यापि साध्याभाववत्तया तद्वृत्तित्वसामान्याभावस्य व्यभिचारिण्यसत्त्वात्कुतोऽतिव्याप्तिरत आह
पार्थिवत्वादीति पार्थिवत्वविशिष्टं यन्निर्धूमवद्वृत्तित्वं तद्वह्नौ नास्ति वह्नेरपार्थिवत्वादित्यतिप्रसंग इति भावः
आदिना जलत्वादिसंग्रहः व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यस्य प्रयोजनमाह द्वित्वाद्यवच्छिन्नस्यैवेति निर्धूम

त्वाश्रयवृत्तिभेदप्रतियोगितावच्छेदकत्वे सति समानाधिकरणत्वे २

तीयो॥तीत्पदोषः नन्वेवमपि जलवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावस्य नीलधूमरूपशालिनो वन्हौ सत्वादतिव्याप्तिः नन्वव्या
सज्यवृत्तिधर्मानवच्छिन्नत्वं परित्यज्य स्वत्वं न वृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां विशेषणं वाच्यमतो नोक्तदोषः
तथापि गुणभेदाभावसजातीयस्य पर्वतगुणवृत्तित्वादिविशिष्टगुणसमवेतत्वाभावस्य हेतौ सत्वात् गुणभिन्नं सत्वादित्यादा
वतिप्रसंगादत आह तत्तत्साध्याभाववद्वृत्तित्वत्वाति क्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताको वा बोध्य इति
अयं पाठः क्वाचित्कः तत्रातिरिक्तांतेन निर्वह्निवृत्तित्वसामान्याभावादेः संग्रहः अन्यथा वह्निसामान्याभावसजातीय
स्य समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिध्याऽव्याप्तिप्रसंगात् न च निर्धूमत्वादिसजातीय
स्य निर्धूमवृत्तित्वत्वादिनावच्छिन्नस्य वृत्तेरभावस्य हेतौ सत्वात् धूमवान्वन्हेरित्यादावतिव्याप्तिः हेतुताघटकसंबंधाव
च्छिन्नवृत्तितामात्रानिष्ठत्वेन प्रतियोगितायां विशेषणीयत्वेपि निर्धूमवृत्तित्वत्वेन जलवृत्तित्वजलान्यनिर्धूमवृ
त्तित्वोभयाभावमादायातिव्याप्तितादवस्थ्यमिति वाच्यम् एतदस्वरसेनैव यद्वेत्यादिना क्षितीपल तणांतरस्य व
क्ष्यमाणत्वात् यद्यपि तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाऽप्रस्यैव तत्सम्पत्के समानाधिकरणधर्मादिकं
प्रतियोगिनिषेधरूपप्रवेशो व्यर्थः सर्वत्र व्याधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्यैव
तादृशसाध्याभावसजातीयस्य संभवात् तथापि यथासन्निवेशान्न वैयर्थ्यम् यत्तादात्म्यसंबंधेन हेतुता

ना

तस्य तस्यैवाभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादि वह्नित्वावच्छिन्नं प्रति व्यापकत्वात् व्यभिचारिण्यतिव्याप्तिरतो
यावन्त इति तथा च धूमादिसामान्याभावस्यापि साध्याभावतया यावदन्तर्गततया तद्व्यापकीभूताभावप्रतियोगितावच्छे
दकेन धूमत्वादिना वह्न्यादिकं प्रति व्यापकत्वाभावान्नातिव्याप्तिः ननु वह्न्यभावसजातीयस्य तद्व्यापकीभूताभा
के वस्य प्रतियोगितावच्छेदकेन तत्तद्वह्नित्वादिना धूमत्वावच्छिन्नं प्रति व्यापकत्वाभावादसंभव इत्यत तादृशाः सा
ध्याभावा इति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावा इति तदर्थः त
त्तद्वह्नित्वादिकं तु न साध्यव्यापकतावच्छेदकमतस्तदवच्छिन्नाभावमादायापि नोक्तदोषः तादृशयावत्साध्याभा
वसाजात्यं तादृशयावत्साध्याभावव्यक्तिप्रागुक्तान्यतररूपवत्त्वमतः न व्यतिरेकिण्यप्रसिद्धिः अतः प्रत्येकमि
ति यद्यपि तादृशयावत्साध्याभावानां प्रत्येकं निरूपितमपि साजात्यं न कुत्राप्यस्तीति व्यतिरेकिण्यव्याप्तिस्तद
वस्थ्यम् तथापि तेषामित्यत्र तस्य तस्य तस्य चेत्येकशेषकरणाद्यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयस्य तत्त
द्व्यापकीभूताभावस्यालाभाददोषः धूमादिसामान्याभावव्यापकस्य वह्नित्वादिना घटाद्यभावस्य प्रतियोगिता
वच्छेदकेन वह्नित्वादिना वह्नित्वावच्छिन्नं प्रति व्यापकत्वाद्व्यभिचारिण्यतिव्याप्तिरतः सजातीयस्येति सा

वृत्तित्ववन्हिभेदोभयत्वावछिन्नस्यैवेत्यर्थः नन्वेवमिति अन्यथानिर्वन्हिसंयुक्तत्वाभावस्य साध्याभाववद्वृत्तित्वव्या
पकप्रतियोगिताकत्वाभावान्निर्वन्हिवृत्तित्वसामान्याभावस्य च धूमे ऽसत्वाद् व्याप्तिरेव स्यादिति भावः इत्थं चेति सा
ध्याभाववद्वृत्तिमत्वस्य हेतावच्छेदकसंबंधेनोक्तौ चेत्यर्थः तादृशसंबंधेन हेत्वाधिकरणताप्रवेशे गौरवमतः कस्य
चिदकारणेत्युक्तम् तथा च हेतुतावच्छेदकसंबंधावछिन्नाधिकरणतावद्वृत्तिमत्वं साध्याभावे विशेषणमित्यर्थः स
त्वादित्यादावादिपदेन वन्हिमान्धूमादित्यादिसंग्रहः तत्रापि जातिसामान्याभावादेः साध्याभाववत्यात्तद्वृत्तिसंयो
गेन वृत्तित्वाप्रसिद्धेरव्याप्तिसंभवात् ननु द्रव्यं विशिष्टसत्वादित्यत्राव्याप्तिः विशिष्टस्य सत्वानतिरेकेण द्रव्यत्वाभाव
वद्वृत्त्या द्रव्यत्वाभावसजातीयस्य तद्वृत्तित्वाभावस्य हेतावसत्वात् न चैवं विशिष्टहेत्वाधिकरणवृत्तिमानएव साध्या
भावो गृह्यतां तावतैवोक्तदोषव्युदास इति वाच्यम् तथापि सतिधूमान् वन्हेरित्यत्राव्याप्तेः निर्धूमवृत्तित्वसामान्याभा
वस्य महानसीयवन्हावसत्वात् न च हेतुतावच्छेदकधर्मावच्छेदेन तादृशवृत्तित्वाभाव वत्वं विवक्षितमिति वाच्यम्
तथापि सत्यपि निर्धूमत्वादिसजातीयं निर्धूमवृत्तित्वत्वेन वन्हिवृत्तेरभावं तद्रूप्येण जलवृत्तित्वजलान्यधूमवृत्तित्वो नि
भयाभावं चादायातिव्याप्तितादवस्थ्यात् अत आह यद्वेति वन्हित्वाद्यवछिन्नधूमाभावसजातीयस्य तद्व्यापकीभूय

निर्धूमवृत्तित्वत्वेन २

धिकरणपस्याप्रविष्टतया न व्यापकीभूतत्वपर्याप्तस्य व्यर्थतेति ध्येयं यत्तु साध्यतावच्छेदकसंबंधेन साध्यव्यापकता
याः पदस्य च्छेदकं तेनैव संबंधेन तद्रूपावच्छिन्नसाध्याभावो ऽत्र साध्याभावपदार्थः तथा चायोगोलकभेदत्वस्य न संयोगात्म
कसाध्यतावच्छेदकसंबंधेन धूमव्यापकतावच्छेदकत्वमिति तदवच्छिन्नाभावो न साध्याभावः किंतु धूमाद्यभाव एव तत्स
मानाधिकरणवह्न्याद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वादतिव्याप्तिरतः
समानाधिकरणस्येत्यपहाय व्यापकीभूतस्येत्युक्तम् न चैवं वह्निमान् धूमादित्यत्राव्याप्तिः संयोगेन वह्न्यभावस्यापि सा
ध्याभावतया तस्य केवलान्वयित्वेन तत्तज्जातीयव्याप्यवृत्त्यभावाप्रसिद्धेरिति वाच्यम् यावंतो व्याप्यवृत्तयः साध्याभा
वास्तेषामेव प्रवेशः तथा वह्निसामान्याभावस्यापि निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वरूपव्याप्यवृत्तित्वाविरहेण या
वदंतर्गतत्वात् धूमाभावस्तु वह्निमदयोगोलक एव तादृशव्याप्यवृत्तिरिति तन्न तादात्म्येन प्रमेयमात्रस्य सा
ध्यतायामव्याप्तेः तत्र प्रमेयत्वादेरेव तादात्म्येन साध्यव्यापकतावच्छेदकतया तादात्म्येन तदवच्छिन्नाभावा
प्रसिद्धेः अन्ये तु यावंतः साध्याभावाः प्रत्येकं तत्तज्जातीयानि यद्यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं तत्तत्साध्या
भावव्यापकतावच्छेदकं तत्तद्रूपेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमर्थः अत्र च साध्याभा
वव्यापकतावच्छेदकत्वमपहाय साध्याभावसमानाधिकरणवृत्तित्वोक्तौ गुणान्यत्वविशिष्टसत्ताभाववान्द्र

95

गगनाभाववद्
भावभिन्नत्वान्य
तररूपेण १

साध्याभावसजातीयाभावेऽभावत्वघटित
व्यापकत्वानंगीकारेऽव्याप्ति[illegible] ५

मात्यं तु प्रागुक्तदिशा प्राग्वत् तेन संयोगादिसंबंधावच्छिन्नद्रव्यत्वाद्यभावप्रतियोगितावच्छेदकेन द्रव्यत्वत्वादि
नावह्न्यादिव्यापकत्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः तादृशाभावस्यापि धूमादिसामान्याभावसाजा
त्यविरहादिति ध्येयं धूमादिसामान्याभावसजातीयस्य तद्व्यापकीभूतस्य वह्निसंयोगाद्यभावस्य प्रतियो
गितावच्छेदकेन वह्निसंयोगत्वादिना वह्न्यादिकं प्रति व्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तीति व
स्तुतो वह्नित्वेन धूमवद्वृत्त्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन वह्निं प्रति व्यापकत्वादतिव्याप्तिरतो व्याप्य
वृत्ति[illegible]तानिरूपकप्रतियोगितायाश्चलाभाय व्याप्यवृत्तिपदं तेन यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्न
सामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगिताया एव लक्षणघटक
त्वान्नोक्तदोषः धूमाद्यभावसजातीयस्य वह्न्याद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्न्यादिकं प्र
तिव्यापकत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतो व्यापकीभूतस्येति यद्यपि तत्र व्यभिचारस्थलान्यत्वाभा
वस्यापि निरुक्तसाध्याभाववद्वृत्तित्वसमानाधिकरण्यस्य तत्सजातीयाभावस्य प्रतियोगितावच्छेदकधर्मेण
तत्तद्योगोलकभेदत्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वाभावात्सामानाधिकरण्यमात्रोक्तावपि
नातिव्याप्तिः तथापि साध्याभावव्यापकत्वघटितनिरुक्तौ साध्याभावसजातीयाभावे साध्याभावसामाना

जा.प्र.
४८

प्रथमे दूषणमाह इत्थमित्यादि तादृशाभावेति साध्याभावसजातीयव्यापकीभूताभावेत्यर्थः द्वितीये दूषणमाह ज्ञेयं प्रमे
यादिति प्रमेयत्वादेरिति न च सामान्यधर्मेण विशेषाभावस्य व्यवस्थापितत्वात् प्रमेयत्वेन गगनाभावस्यैव प्रागुक्तक्रमेण सा
ध्याभावसजातीयस्य प्रतियोगितावच्छेदकप्रमेयत्वमादाय नाव्याप्तिरिति वाच्यम् तथापि विषयत्वापेक्षया गुरोः प्रमावि
षयत्वस्य प्रतियोगितानवच्छेदकत्वेनोक्ताव्याप्तितादवस्थ्यादिति भावः नव्यास्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्स
जातीयो यत्तत्समानाधिकरणो व्याप्यवृत्त्यभावस्तत्प्रतियोगित्वमेव व्याप्तिः व्याप्यवृत्तित्वं तु प्रकृतहेतुसमानाधि
करणस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्त्वम् तेन धूमसामान्याभावसमानाधिकरणस्य तत्सजाती
यस्य च वन्हिधूमोभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगित्वेपि धूमसाध्यकवन्ह्यादौ नातिव्याप्तिः तादृशोभयाभावे
साध्य ५ निरुक्तव्याप्यवृत्तित्वाभावात् एवं च यत्राभावे प्रकृतहेतुसामानाधिकरण्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभया
भावः स एव साध्याभावपदार्थः तेनाभाववान् प्रमेयत्वादित्यादौ साध्यप्रतियोगिकस्य घटावृत्तित्वावच्छिन्नाभावस्याधि
करणे घटादौ वर्तमानस्य तत्तत्सजातीयहेत्वभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्धावपि नाव्याप्तिः इत्थं च द्रव्यं सत्वा
दित्यादौ गुणान्यत्वाद्यभावस्यापि निरुक्तसाध्याभावत्वात्तदधिकरणे गुणादौ वर्तमानस्य तत्सजातीयाभावस्य निरुक्तव्या
प्यवृत्तित्वाप्रसिद्ध्यैव नातिव्याप्तिः वाच्यं प्रमेयमित्यादौ तु व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावसमानाधिक

राम
४८

व्यान्यत्वविशिष्टसत्ताभावादित्यत्रातिव्याप्तिः गुणान्यत्वविशिष्टसत्ताभावाभावरूपस्य द्रव्यान्यत्वाभावरूपस्य वानिरु
क्तसाध्याभावस्य सजातीये समानाधिकरणे च सत्तात्वरूपेणाभावे वर्तते यतः द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्मावच्छि
न्नप्रतियोगिताकाभाववत्वं तेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपेण हेतुतावच्छेदकावच्छिन्नं प्रतिव्यापकतावच्छे
दात् साध्याभावव्यापकतावच्छेदकत्वोक्तौ तु द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभाववत्वादिके
न गुणान्यत्वविशिष्टसत्ताभावाभावात्मकस्य द्रव्यान्यत्वाद्यभावरूपस्य वा साध्याभावस्य व्यापकतावच्छेदके द्रव्यए
व्यभिचारादतो नोक्तदोष इति प्राहुः द्रव्यविशिष्टसत्त्वादित्यादौ व्यापकीभूततादृशाभावप्रतियोगितावच्छेदकेन ध
र्मेण गुणकर्मान्यत्वादिविशिष्टसत्तात्वादिना सत्त्वादिकं प्रतिव्यापकत्वानवच्छेदाद्व्याप्तेराह यद्रूपावच्छिन्नं प्रतीति
न चैवं गमनं स्पन्दत्वादित्यादौ तादृशगतित्वाद्यभावस्य प्रतियोगितावच्छेदकीभूतेन गतित्वत्वादिनापि काल्ि
कसंबंधेन स्पंदत्वव्यापकत्वादतिव्याप्तिरिति वाच्यम् तादृशसाध्याभावस्य प्रतियोगितायाः अवच्छेदकीभूतो
पः संबंधस्तत्प्रतियोगितावच्छेदकसंबंधेन हेतुव्यापकत्वस्योक्तत्वान्नातिव्याप्तिरिति भावः परैः परिष्कृतं तन्नि
रसितुमाह साधनस्येत्यादिना तादृशेति यावत् ततः साध्याभावाः प्रत्येकं तत्तत्सजातीयव्यापकीभूताभावेत्यर्थः त
दवच्छेदकत्वमिति तत्तत्साध्याभावसजातीयतत्तद्व्यापकीभूताभावप्रतियोगितावच्छेदकत्वमित्यर्थः

यत्वादित्यादौ अव्याप्तिः व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वादिसमनियतप्रतियोगिताकस्य संयुक्तत्वादिसामा
न्याभावस्य हेताववसत्वात् अतो वृत्तिमद्वृत्तपदमुक्तम् तदनुक्तावसंभवो नास्ति तादात्म्यसंबन्धेन हेतावेव लक्षणगमनात्
व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वस्तुगत्या तादृ
शवृत्तित्वत्वव्यापकप्रतियोगिताकतया तथाविधयावदभावस्यैव हेतौ सत्त्वादिति ध्येयम् येन संबंधेन हेतुना वृत्ति
मद्वृत्तपदस्यत्रापि वृत्तिमत्त्वं तेनैव संबंधेन बोध्यमिति पाठः तदभावस्येति तत्सामान्याभावस्येत्यर्थः जात्यादावीति समवेत
त्वघटितजातित्वोत्थासम्बन्धान्तरेणापि यो वृत्तिमान् तद्वृत्तित्वमुपदर्शितं न त्वादि: नाव्याप्तिः हेतुताघटकसंबंधेयो वृत्ति
मान् तद्वृत्तित्वेन तादृशाभावस्य यावदन्तर्गतत्वादिति भावः अत्र वृत्तिमद्वृत्तित्वं दैशिकविशेषणतया ग्राह्यम् तेन
वाच्यं घटत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभाववत्समवेतत्वसमनियतप्रतियोगिताकस्य समवेतत्वसा
मान्याभावस्य हेतुताघटकसमवायसंबंधेन वृत्तिमति स्पंदादौ कालिकसंबंधेन वर्तमानस्य दैशिकविशेषणतया घट
त्वादिहेतावसत्त्वेपि नाव्याप्तिः इत्यत्रापीत्यपिकारेण साध्याभाववति वृत्तिरपि हेतुताघटकसम्बन्धेनैव ग्राह्येति व्यंजि
तं तेन तत्तद्भावयवान्यत्वाभावस्यापि पूर्वोक्तद्वितीयरीत्या साध्याभावत्वेन तद्वृत्तिसम्बन्धसामान्येन यावृत्तिस्तद
भावस्य तत्तद्भावयवासमानकालीनद्व्यवृत्ते धूमहेतावसत्त्वेन वाह्निमान्धूमादित्यादौ नाव्याप्तिः ननु साध्यप्रति

त्व

रणस्य विरहद्घटपटत्वाभ्यां प्रमेयसामान्याभावस्य घटत्वादिनावाच्यत्वाद्यभावस्यैव वा निरुक्तव्याप्यवृत्तिताशालिनः प्र
तियोगितामादाय लक्षणसंभव इति यथाश्रुतमेव मिश्रलक्षणं सम्यगिति प्रतीम इति प्राहुः व्यापकीभूतस्य सजातीयस्ये
त्यादिपरित्यागेन लघुलक्षणमाह यद्वेति तादृशा इति प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभा
व इत्यर्थः अत्रापि यत्संबंधेन साध्यव्यापकता तत्संबंधावच्छिन्नाभावानां प्रतियोगितावच्छेदकधर्मैस्तत्संबंधेन यद्रूपा
वच्छिन्नप्रति व्यापकत्वमवच्छिद्यत इति पर्यवसितार्थः तेन गमनस्पंदत्वादिना दैगमनत्वाद्यभावप्रतियोगितावच्छेदकै
र्गमनत्वत्वादिभिः कालिकसंबंधेन स्पंदत्वादिहेतुव्यापकतावच्छेदकत्वेपि नातिव्याप्तिः न वा वाच्यत्वादिभेदप्रतियोगितावच्छेद
कमादायैव केवलान्वयिनि लक्षणसंभवे प्रतियोग्यवृत्तिश्चेत्यादिग्रंथावतारानुपपत्तिः न च धूमत्वेन धूमाभावस्यैव वह्नित्वेन धू
मवद्धेतरभाववत्वादयः पिण्डान्यत्वाद्यभावस्यायः पिण्डान्यत्वलक्षणस्वरूपसंबंधेन भेदत्वावच्छिन्नाभावत्वात्तत्प्रतियोगिताव
च्छेदकीभूतवह्नित्वभेदत्वादिभिर्वह्नित्वाद्यवच्छिन्नप्रतिव्यापकतावच्छेदाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरिति वाच्यम् प
प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नवृत्तित्वव्यधिकरणधर्मावच्छिन्नाभावाभिन्नत्वोभयाभाववत्तादृशप्रतियोगि
तापर्याप्त्यवच्छेदकधर्मस्य लक्षणघटकत्वादिति संक्षेपः यद्वेति साध्याभाववद्वृत्तित्वस्य घटत्वादिनाभावमादाय व्याभि
चारिण्यतिव्याप्तिरितो यावंत इत्युक्तम् तादृशा इति त्वाभाववत्त्वमपि दैशिकविशेषणतया ग्राह्यं तेन निर्धूमवृत्तित्वादिसामा
न्याभावस्यापि कालिकसंबंधेन वन्ह्यादिवृत्तित्वात्साध्यवत्वोपादानेपि नातिव्याप्तिस्तादवस्थ्यमवान्हिमान्धूमादित्यत्र ते

तेन विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यताघटकसमवायसंबंधेनाभाववति हेतोर्वर्तमानत्वेपि द्रव्यंपृ
थिवीत्वादित्यादौ नाव्याप्तिरिति ननु कुत्र वृत्त्यनियामकसंबंधेन साध्यतायां तदवच्छिन्नप्रतियोगित्वाप्र
सिध्या सद्धेतावव्याप्त्यापत्तेः ५ न वान्वेन्हेरित्यादावतिव्याप्त्यापत्तेस्तु संयोगसंबंधावच्छिन्नाभावस्य व्या
प्यवृत्तित्वाभावात् अधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वात् प्रमेयवान्वाच्य
त्वादित्यादौ तादात्म्येन साध्यतायामव्याप्त्यापत्तेस्तु साध्यताघटकतादात्म्यसंबंधेन प्रमेयत्वादेरेव सा
ध्यव्यापकतावच्छेदकतया तत्संबंधेन तदवच्छिन्नाभावाप्रसिद्धेः प्रमेयत्वेन घटपटोभयभेदस्योप
गमेपि तस्य निरुक्तव्याप्यवृत्तित्वाभावाल्लक्षणाऽघटकत्वादिति दिक् वन्हिमान्धूमादित्यादावव्या
प्तिः वन्हिसंयोगाभावस्यापि साध्यव्यापकत्वे तदभावात् एवं वन्हिसंयोगवद्वृत्तित्वसामान्याभावस्यापि
घटादिनिष्ठस्य हेतावभावादतो व्याप्यवृत्तित्वेनाभावो विशेषितः वस्तुतस्तु निरुक्तसाध्याभावाधि
करणत्वमवश्यं विशेषणताविशेषेण प्रवेश्यमन्यथा द्रव्यं गुणादित्यादौ द्रव्यत्वाभावस्य कालिकसं

योगिताकाभावमात्रस्यप्रवेशेधूमस्य ततद्रूपाभाववद्वृत्तित्वात् वन्हिमान्धूमादित्यादावव्याप्तिः साध्यतावच्छेद
कधर्मावच्छिन्नाभावस्यप्रवेशेतु गगनादेः साध्यत्वेद्रव्यत्वादावतिव्याप्तिः तादृशसाध्याभावस्यकेवलान्व
यित्वात् एवं घ्राणग्राह्यगुणवान्प्रमेयवान्वा पृथिवीत्वादित्यादावव्याप्तिः तादृशधर्मावच्छिन्नप्रति
योगित्वाप्रसिद्धेरतस्साध्याभावश्चेति पूर्वोदिति प्रथमरीत्याभिधानेतु वन्हिमान्धूमादित्यादौ तारणाता
त्मभत्वाद्यवच्छिन्नाभाववद्वृत्तित्वस्यधूमेसत्वादसंभवः स्यादिति प्रकृतसाध्यव्यापकतावच्छेदकरूपाव
च्छिन्नप्रतियोगिताकोव्याप्यवृत्तिश्चाभावः साध्याभावशब्दार्थइत्यर्थः यथाश्रुते साध्याभावत्वप्रवेशेना
संगत्यापत्तेः अत्रापि येनसंबंधेनसाध्यव्यापकतातेनसंबंधेन तादृशरूपावच्छिन्नाभावोबोध्यः तेनज्ञान
वानात्मत्वादित्यादौ स्वरूपसंबंधेनसाध्यव्यापकस्यप्रमेयत्वादेः कालिकसंबंधावच्छिन्नाभावाधिकर
णसमवेतत्वाभावस्यस्पंदत्वादिनिष्ठस्यहेतावसत्वेपिनक्षतिः यत्तुसाध्यतावच्छेदकसंबंधेनतादृश
रूपावच्छिन्नाभावानांविवक्षणात् ज्ञानवानात्मत्वादित्यादौनाव्याप्तिः कालिकसंबंधेनप्रमेयत्वाभा
वस्यसाध्यताघटकसमवायसंबन्धेनानवच्छिन्नत्वात् इत्युक्तंच व्यापकतापितेनैवसंबंधेनग्राह्या

वृत्तित्वादेर्भिन्नत्वान्न तद्वृत्तित्वत्वादिना योभावः सोपि साध्याभाववद्वृत्तित्वाभावो यावद् अंतर्गतः तयोर्द्वयोर्मानाभावसत्वादसंभव इत्यत आह तद्वृत्तित्वाभावोपीति मिश्रलक्षणवत् अत्रापि तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्य
वृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्व प्रवेशे आलोकावृत्तित्वावच्छिन्नाभावस्य हेतावसत्वात् वान्हिमान्धूमा
दित्यत्राव्याप्तिरतोऽन्यथा व्याचष्टे स्वव्यापकेति स्वं प्रतियोगितात व्यापकीभूतं यत्तत्तत्साध्याभाववद्वृत्तित्व
त्वं तत् व्यापकप्रतियोगिताकाभाव इत्यर्थः व्याधिकरणधर्मावच्छिन्नसाधारणसाध्याभाववद्वृत्तित्वत्वव्याप
कप्रतियोगिताकस्य व्याधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वात् व्यभिचारिण्यतिव्याप्तिरत उक्तं त
तदिति तथा च निर्धूमवृत्तित्वाभावस्यैव स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकतया

तस्य च धूमादावसत्वान्नातिव्याप्तिरिति भावः स्वनिष्ठ वृत्तित्वत्वरूपेण वृत्तित्वसामान्याभावस्यैव व्याधिकरणध
र्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य हेत्वंतरवृत्तेः स्वस्मिन्नसत्वाद्धेतुमात्रेऽ
संभवापत्तेरतः कल्पांतरमाह तत्तदिति समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्य यावदभाव

स्यैव व्यभिचारिण्यतिप्रसंजकत्वात् अग्रिमकांतं अत्रापि निर्धूमवृत्तित्वत्वस्यापि सामान्यतः साध्याभाववद्वृ
त्तित्वत्वानतिरिक्त समानाधिकरणधर्मतया तदवच्छिन्नसामान्याभावमादायातिव्याप्तेर्वारणाय तत्तदित्युक्तं

वंधेनयदधिकरणं तत्समवेतत्व सामान्याभावस्य ज्ञानादिनिष्ठस्य हेतावसत्त्वादव्याप्त्यापत्तेः तथाच वन्हिसंयोगात्म
कोभावस्य तादृशसंबंधेनाधिकरणप्रसिध्या तमादाय व्याप्तेर्वारणार्थं न व्याप्यवृत्तिपदं परंतु रूपवान्यापि
वीत्वादित्यादौ नित्यत्वादिना रूपाद्यभावस्यापि तादृशधर्मावच्छिन्नाभाववत्तया तद्वत्समवेतत्वाभावस्य नित्य
रूपादिनिष्ठस्य हेतावसत्वादव्याप्तिरतो व्याप्यवृत्तिपदं न च तस्यापि व्याप्यवृत्तित्वादुक्तदोषतादवस्थ्यम्
प्रतियोगिताकाभावे त्वावच्छेदकसम्बन्धेन त्वावच्छेदकधर्मावच्छिन्नवद्वृत्तित्वस्य व्याधिकरणधर्मावच्छि
न्नाभावभिन्नत्वस्य च द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभाव
स्य उक्तत्वात् नित्यत्वादिरूपाद्यभावस्य च व्याधिकरणधर्मावच्छिन्नाभावभिन्नस्य त्वावच्छेदकीभूतनित्यत्वाव
च्छिन्नवद्वृत्तित्वादेव व्युदासः एतेन संयोगाभाववत्त्वादेः साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया प्र
तियोगिवैयधिकरण्या पादितसाध्यव्यापकतानवच्छेदकत्वेपि न व्याप्यवृत्तिपदवैयर्थ्यमिति
ध्येयं ननु वन्हिमान्धूमादित्यादौ आलोकावृत्तित्वादिना आलोकावृत्तिसामान्याभावोपि सा
ध्याभाववद्वृत्तित्वाभावो यावदंतर्गतः संयोगादिसंबन्धावच्छिन्नवन्हिसामान्याभाववद्वृत्तित्व
स्याप्यालोकावृत्तिमध्ये निवेशात एवाभिंधनत्वावच्छिन्नवन्ह्यभावाधिकरणीभूतमहानस [illegible]

यैवतदवच्छिन्नाभावमादायाव्याप्त्यसंभवात् । किं चैवं गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन घटाभिन्नं
यत्वादिसाध्यकेऽतिव्याप्तिः स्यात् न हि घटवृत्तित्वापेक्षया गुरुत्वेन न घटभेदाभाववद्वृत्तित्वत्वाव
च्छिन्नाभावाप्रसिद्धेस्तद्घटवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मतया तदव
च्छिन्नाभावस्य लक्षणघटकत्वादेवं लोहसंयुक्तत्वादिसाध्यकेऽपि हृदशून्यत्वाभाववद्वृत्तित्वत्वादेर्जल
वृत्तित्वत्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्याऽतिव्याप्तिर्दुर्वारेति दिक् । यस्य कस्यचित्सामाना
धिकरण्यम् अव्यावर्तकमनन्तप्रतियोगितासमानाधिकरणत्वप्रवेशापेक्षया लाघवमनुसृत्याह वृत्ति
त्वव्यापकीनावेति साध्याभाववद्वृत्तित्व च तिनावेति पाठे साध्याभाववत्पदस्यापाततः पातम् यद्यपि वृत्तित्व
वृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य घटत्वादिसामान्याभावस्य घटान्यत्वाभावस्य च यावदन्तर्गतस्य
हेतावसत्त्वाद्वह्निमान्धूमादित्यादौ सर्वत्रासंभवः तादृशधर्मानवच्छिन्नवृत्तित्वानिष्ठप्रतियोगिताका
भावविवक्षणेऽपि घटभेदत्वेन घटभेदानिर्वाहे वृत्तित्वान्यतराभावस्य तादृशस्य हेतावसत्त्वात्
तथापि पूर्ववदत्रापि कल्प्ये हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाभिन्नावृत्तित्वेन प्रतियोगित्वं विशे
षणीयमित्यदोषः स्वरूपेण वृत्तिधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताया एव तादृशावृत्तित्व

प्रतियोगिता

नचैवमपि अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन घटवृत्तित्वजातित्वान्यतरस्य घटावृत्तेर्वाभावमा
दाय दण्डः पृथिवीत्वादित्यादावव्याप्तिः हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वाभिन्नावृत्तित्वेनापि प्रतियोगि
तायाविशेषणीयत्वात् अन्यतरत्तत्साध्याभाववद्वृत्तित्वावच्छिन्नाभावाद्यनुक्तौ वा संयोगेपत्वादित्या
दावव्याप्तिः साध्याभाववद्वृत्तित्वावच्छिन्नयद्धेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभिन्नावृत्तिप्रति
योगित्वं तादृशप्रतियोगिताकस्य वृत्तिमद्वृत्त्यभावस्याप्रसिद्धेर्निषेधद्वयगर्भता नेन घटत्वादिना
तादृशवृत्तित्वाभावमादायैव तत्र लक्षणसंगतिः केचित्तु यत्रापि तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छि
न्नाभावं तोऽभावाद्यपेक्षलाघवाद्धेतुमुपादीतं तथापि वा व्यंप्रमेयादित्यादौ तादात्म्येन हेतौ जगत एव
साध्याभाववत्तादात्म्यत्वावच्छिन्नाभावाप्रसिद्ध्याव्याप्तिरतो निषेधद्वयगर्भता इत्थं चाविरुद्धघट
त्वपटत्वाभ्यामेव तादृशवृत्तित्वाभावः सुलभ इत्याहुः यत्तु वृत्तित्वत्वमपेक्ष्य गुरोर्वाच्यत्वाभाववद्वृत्तित्वत्वस्य
प्रतियोगितानवच्छेदकतया केवलान्वयिन्यव्याप्तिरिति तत्तत्साध्याभाववद्वृत्तित्वावच्छिन्नाभावानोक्त इ
ति तन्तुच्छं गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमादायैव लक्षणकरणात् अन्यथा तत्कालस्य वृत्तिमद्वृ
त्तिपदवैयर्थ्यापत्तेः वृत्तित्वत्वमात्रस्यैव तत्तत्साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मत

एवस्यान्न तु वह्निमान्धूमादित्यादौ अव्याप्तिमात्रं प्रमेयमात्रस्य हेतुतास्थलेपि तत्तत्प्रमेयवन्निष्ठवृत्तित्वाभावस्य प्रमेयान्तर
वृत्तेस्तत्तत्प्रमेयविरहादेव्यावेदापि तु सर्वसाधारण्येनाह स्वनिष्ठेति स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तत्सामान्याभावस्ये
त्यर्थः अत्र घटत्वादौ साध्ये त्वीयविशेषणतया घटाऽन्यत्वादि हेतावतिव्याप्तिः साधनस्यैव हेतुतावच्छेदकसंबंधेन
वृत्तिमत्तया तन्निष्ठस्य यावदभावस्य हेतौ सत्त्वात् नचैतस्य विरुद्धत्वात् साध्यसमानाधिकरणत्वेन हेतुविशेषणदे
वनातिव्याप्तिरिति वाच्यम् तथापि ऽव्यत्वादौ साध्ये त्वीयपक्षमवादिनासत्वादिहेतावतिव्याप्तिः तादृशसंबंधेन हेतो
रेव वृत्तिमत्तया तन्निष्ठयावदभावस्य साध्यासमानाधिकरणस्य च हेतौ सत्त्वात् एवं महाकालोन्यो घटादित्यत्र कालि
कसंबंधेन हेतावतिव्याप्तिः हेतुताघटककालिकसंबंधेन महाकालवृत्तेस्तेन संबंधेन तद्वृत्तित्वासंभवात् न च
महाकालवृत्तित्वसामान्याभावस्य स्वं ऽभलयावच्छेदेन पक्षादौ वृत्तिमति वृत्तित्वान्नातिप्रसंग इति वाच्यम् सामाना
धिकरण्यस्य व्याप्यवृत्तित्वादन्यथा घटादिहेतावपि स्वं ऽकालावच्छेदे न महाकालवृत्तित्वाभावस्य सत्त्वादुक्तातिं
व्याप्तितादवस्थ्यम् एवं द्रव्यत्वादेः साध्यत्वे ऽवृत्तिगगनादिहेतावतिव्याप्तिः विशिष्टसत्तायामव्याप्तिश्च इत्या
न्यास्त्विन्निर्गुणादौ विशिष्टसत्ताया वृत्तित्वादिति वदंति यदि च वृत्तिमद्वृत्ति यो यावं : साध्याभाववद्वृत्तित्वाभावा
सद्धत्वावच्छिन्नाधिकरणतासामान्यकधर्मवत्त्वमिति विवक्ष्यते तदा न तेषामेकोपि दोषः पदमादधाति

रा

107

त्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नत्वं विवक्षणीयमित्यपि काश्चित् वृत्तिनाधर्मेणवेति पाठे तु प्रमेयत्वाभावमादायासंभ
वलक्षणारणाय धर्मेणवेति कल्पांतरोल्लेखः तथा च प्रमेयत्वघटभेदत्वादे न्तादृशवृत्तित्वत्वातिरिक्तधर्मत्वादेवतदव
च्छिन्नसामान्याभावमादाय नासंभवः वाच्यं प्रमेयादिव्याप्यादौ तादात्म्येन हेतौ विहगघट त्वपटत्वाभ्याम वृत्तिगगनादिना
वा वृत्तित्वाभावमादाय लक्षणसमन्वय इति ध्येयम् स्वव्यापकतन्नत्साध्याभाववद्वृत्तित्वत्वेत्यस्य व्यावृत्तिमाह आलो
काद्यवृत्तित्वेनेति निर्वह्नि वृत्तित्वस्येति प्रतियोगितायां न तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वप्रदर्शनार्थं न च स्व
व्यापक वृत्तित्वत्वकेत्युक्तावपि आलोकावृत्तित्वावच्छिन्नाभावस्य वारणसंभवात् प्रतियोगितानव्यापकत्वादिति शीत
तन्नत्साध्याभाववत्प्रवेशो व्यर्थ इति वाच्यम् आलोकावृत्तित्वत्वाभावमादायाव्याप्तिवारणार्थं तस्यावश्यकत्वात् स्व
समानाधिकरणाभावाप्रतियोगी तन्नत्साध्याभाववद्वृत्तित्वत्वाश्रयनिष्ठात्यंताभावाप्रतियोगिप्रतियोगिताकत्व
स्वपर्यवसितार्थं तन्नत्साध्याभाववतः सकृदेव निवेशे न पादेयपर्यांशंकाशाश्चेति भावः तन्नत्साध्याभाववद्वृ
त्तित्वत्वव्यापकप्रतियोगिताकेत्यस्य फलमाह यत्रेत्यादिना घटत्वादेः साध्यव्यापकतानवच्छेदकत्वाभा
वात्तदवच्छिन्नवन्ह्याद्यभावस्य लक्षणघटकत्वादाह इंधनत्वेति इन्धनत्वावच्छिन्नसामान्याभावस्य महानसा
दावसत्वात् तमादाय तातिविरहादाह वन्ह्यभावेति तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकेत्यस्यानुक्तौ असंभव